अंक २

संस्कृत-पाठ-माला।

[संस्कृत भाषाका अध्ययन करनेका सुगम उपाय।]

द्वितीय भाग।

लेखक और प्रकाशक

श्रीपाद दामोदर सातवळेकर,

स्वाध्याय-मंडल, औंध, (जि० सातारा)

पंचम वार

संवत् १९९२, शके १८५७, सन १९३५

मूल्य ।=) छः आने।

आपकी उन्नति ।

आपकी उन्नति संस्कृत भाषामें कितनी हो रही है और अति अल्पकालमें आपको संस्कृत वाक्य बनाना भी कितनी सुगमतासे आ गया है, यह आपने प्रथम भागमें देख ही लिया है ।

अब यह द्वितीय भाग आपके सन्मुख प्रस्तुत किया जाता है और पूर्ण आशा है, कि इससे भी आपको अत्यंत लाभ होगा और आपकी प्रगति संस्कृत में अति अल्प प्रयत्नसे ही हो जायगी ।

स्वाध्याय-मण्डल,
औंध (जि. सातारा)
चैत्र शु० सं० १९९२

लेखक,
श्रीपाद दामोदर सातवळेकर

मुद्रक और प्रकाशक- श्री० दा० सातवळेकर,
भारत मुद्रणालय, स्वाध्यायमंडल, औंध, (जि० सातारा.)

संस्कृत-पाठ-माला ।

द्वितीय भाग ।

पाठ १

निम्नालिखित शब्द ध्यानमें रखिये—

पिबति--(वह) पीता है ।
पिबसि--(तू) ,, ,, ।
पिबामि--(मैं) पीता हूं ।
भक्षयति--(वह) भक्षण करता है ।
भक्षयसि--(तू) ,, ,, ।
भक्षयामि--(मैं) भक्षण करता हूं ।
पास्यति--(वह) पीयेगा ।
पास्यसि--(तू) पीयेगा ।
पास्यामि--(मैं) पीऊंगा ।
भक्षयिष्यति--(वह) भक्षण करेगा ।
भक्षयिष्यसि--(तू) भक्षण करेगा ।
भक्षयिष्यामि--(मैं) भक्षण करूंगा ।

अब इनसे बननेवाले वाक्य देखिये—

संस्कृत वाक्य ।

अहं जलं पिबामि—मैं जल पीता हूं ।
त्वं जलं किं न पिबसि ?—तू जल क्यों नहीं पीता ?

सः इदानीं दुग्धं नैव पिबति-- वह अब दूध नहीं पीता

यः दुग्धं न पिबति — जो दूध नहीं पीता। ।

सः फलं न भक्षयिष्यति--वह फल नहीं खायेगा।

सः तत्र अन्नं भक्षयति- वह वहां अन्न खाता है।

यदि त्वं दुग्धं न पास्यसि---- यदि तू दूध न पीयेगा,

तर्हि अहं जलं पास्यामि---- तो मैं जल पीऊंगा।

अब आप निम्नलिखित वाक्योंके भाषावाक्य बनाइये--

संस्कृत वाक्य।

सः श्वः अन्नं कुत्र भक्षयिष्यति ? तव गृहे सः उदकं पास्यति वा न वा ? कथं स तस्य पात्रे दुग्धं पास्यति? मम पात्रं तस्य पात्रात् अधिकं शोभनं अस्ति। तव वस्त्रं मम वस्त्रात् अधिकं शोभनं नास्ति। अहं तव नगरं नैव गमिष्यामि। सः इदानीं गृहे एव तिष्ठति तं तत्र नय। त्वं गोदुग्धं किं न पिबसि ? अहं गोदुग्धं एव पिबामि। सदा एव अहं गोदुग्धं पिबामि पास्यामि च। त्वं अपि तथा कुरु। तस्य वृक्षस्य फलं स तत्र नयति। त्वं अत्र पत्रं लिख। अहं इदानीं एव गृहं गमिष्यामि। विश्वामित्रः कुत्र गतः ? स इदानीं कुत्र अस्ति ? कस्मिन् गृहे स इदानीं अस्ति? स इदानीं उद्याने अस्ति, पुष्पं फलं च आनयति। त्वं अत्र आगच्छ, उपविश, पुस्तकं च पठ।

पाठ २

निम्नलिखित शब्द अब स्मरण कीजिये—

शब्द ।

वानरः—बंदर	लेखः— लेख
बिडालः— बिल्ली	दण्डः— सोटी
मार्जारः— ,,	ब्राह्मणः— ब्राह्मण
आतपः— सूर्यकिरण, धूप	कुमारः— लडका
मंत्रः— मंत्र	अपराधः— गुन्हा
वेदः— वेद	बालः— लडका

अब इनका वाक्योंमें उपयोग कीजिये—

संस्कृत वाक्य ।

१ तत्र पश्य, वानरः दुग्धं पिबति। २ तत्र वानरः नास्ति, स बिडालः अस्ति, यः दुग्धं पिबति। ३ तस्मिन् आतपे त्वं किं न गच्छसि ? ४ तस्मिन् पात्रे त्वं किं करोषि ? ५ सः कस्य शोभनः कुमारः ? ६ सः हरिश्चंद्रस्य शोभनः बालः ।

भाषा-वाक्य ।

१ वहां देख, बंदर दूध पीता है। २ वहां बंदर नहीं है, वह बिल्ली है, जो दूध पीती है। ३ उस धूपमें तू क्यों नहीं जाता? ४ उस पात्रमें तू क्या करता है ? ५ वह किसका सुंदर लडका है ? ६ वह हरिश्चंद्रका सुन्दर लडका है ।

अब निम्नलिखित वाक्य आप पढतेही समझ सकते हैं-

संस्कृत-वाचन-पाठः ।

तव पुस्तकं अहं तत्र नयामि । स मम फलं अत्र आनयति । गोपालः गोदुग्धं कुत्र नयति ? भीमसेनः इदानीं यत्र अस्ति, तत्र त्वं अधुना न गच्छ । यत्र मम बिडालः अस्ति, तत्र त्वं इदानीं एव गोदुग्धं नय । सुवर्णस्य आभूषणं कः करोति ? मया सुवर्णस्य आभूषणं कदापि न कृतम् । मम गृहे एकः पुरुषः अस्ति, सः सुवर्णस्य आभूषणं शोभनं एव करोति । तव पात्रं अत्र आनय । कुत्र अस्ति तस्य पात्रम् ? केन तव वस्त्रं तत्र नीतम् ? कः तत्र अस्ति यः एवं करोति ? हे पुरुष ! त्वं किं इदानीं करोषि ? स इदानीं जलं पिबति । यदि त्वं अन्नं न खादसि तर्हि दुग्धं पिब । न युक्तं इदानीं दुग्धं पातुं; केवलं उष्णं जलं एव पिबामि ॥

संधि किये हुए वाक्य ।

तव पुस्तकमहं तत्र नयामि । स मम फलमत्रानयति । गोपालो गोदुग्धं कुत्र नयति ? भीमसेन इदानीं यत्रास्ति, तत्र त्वमधुना न गच्छ । यत्र मम बिडालोऽस्ति तत्र त्वमिदानीमेव गोदुग्धं नय । सुवर्णस्याभूषणं कः करोति ? तव पात्रमत्राऽऽनय ।

पाठ ३

शब्द ।

जानामि– (मैं) जानता हूं ।	ज्ञातं– जान लिया ।
जानासि–(तू) जानता है ।	ज्ञातुं– जाननेके लिये ।
जानाति–(वह) जानता है ।	आज्ञातुं– आज्ञा करनेके लिये
पातुं– पीनेके लिये ।	पानं– पीना ।
इति– ऐसा ।	कति– कितने ।

संस्कृत वाक्य ।

१ किं त्वं जानासि कः अहं अस्मि ? २ अहं न जानामि त्वं कः असि । ३ अहं विष्णुमित्रस्य पुत्रः कृष्णशर्मा अस्मि । ४ त्वं पुस्तकं इदानीं कुत्र नयासि? ५ स पुरुषः पठितुं इच्छति । ६ मया ज्ञातं तव हस्ते किं अस्ति इति । ७ हे मनुष्य ! तव नाम किं अस्ति ? ८ मम नाम यज्ञसेनः इति ।

भाषावाक्य ।

१ क्या तू जानता है कि मैं कौन हूं ? २ मैं नहीं जानता तू कौन है । ३ मैं विष्णुमित्रका पुत्र कृष्णशर्मा हूं । ४ तू पुस्तक अब कहां ले जाता है ? ५ वह पुरुष पढना चाहता है । ६ मैंने जान लिया कि तेरे हाथमें क्या है । ७ हे मनुष्य ! तेरा नाम क्या है ? ८ मेरा नाम यज्ञसेन है ।

अब निम्नलिखित शब्द कंठस्थ कीजिये—

मोदकः= लड्डु	ओदनः= चावल
कंदुकः= गेंद	भक्तः= भक्त (भक्त)
आनंदः= आनंद	आमोदः= सुगंध
मणिकारः= जौहरी ।	धृतः= धारण किया हुआ
सुवर्णकारः= सुनार	आघ्रातः= सूंघा हुआ
लोहकारः= लुहार	भुक्तः= भोजन किया हुआ
वस्त्रकारः= जुलाहा	अर्थः= पैसा, धन

संस्कृत वाक्य।

१ सः बालः आनंदेन मोदकं खादति । २ पश्य कथं सः खादति? ३ हे सुवर्णकार! मम बालकाय एकं भूषणं देहि । ४ वस्त्रकारः तस्मै पुरुषाय वस्त्रं करोति। ५ कः पुरुषः अर्थस्य दासः ? ६ कः नरः ईशस्य भक्तः? ७ अहं अर्थस्य दासः न अस्मि, परंतु ईश्वरस्य भक्तः अस्मि ।

भाषा-वाक्य ।

१ वह बालक आनंदसे लड्डु खाता है । २ देख, वह कैसे खाता है ? ३ हे सुनार ! मेरे बालकके लिये एक भूषण दे । ४ जुलाहा उस मनुष्यके लिये वस्त्र बनाता है । ५ कौन मनुष्य धनका दास है ? ६ कौन मनुष्य ईश्वरका भक्त है ? ७ मैं धनका दास नहीं हूं, परंतु ईश्वरका भक्त हूं ।

पाठ ४

अब निम्नलिखित वाक्य पढ़िये—

संस्कृत-वाचन-पाठः ।

तस्मै पुरुषाय मोदकं देहि । यदि सः मनुष्यः इदानीं एव खादितुं न इच्छति तर्हि तस्मै न देहि । कः इदानीं मोदकं खादितुं इच्छति ? अहं मोदकं न खादितुं इच्छामि, परंतु फलं भक्षयितुं इच्छामि । यथा त्वं इच्छसि तथा कुरु । यदि दुग्धं पातुं इच्छसि तर्हि गोदुग्धं एव पिब । यदि जलं पातुं इच्छसि तर्हि मम कूपस्य एव जलं पिब ।

यदा स मनुष्यः कूपस्य समीपं गच्छति तदा त्वमपि तेन सह तत्र गच्छ । स तत्र कूपस्य समीपं गच्छति, परंतु जलं न आनयति ।

हे नर ! त्वं इदानीं वेदस्य पुस्तकं अत्र आनय । कं अपि मंत्रं पठ । त्वं वेदस्य मंत्रं जानासि किम् ? वेदस्य मंत्रः त्वया कदा पठितः ? केन सह पठितः ? कस्य पुत्रः त्वं असि ? कुत्र इदानीं पठसि ? किं पठसि ?

सः उत्तमः मनुष्यः अस्ति । सः इदानीं उद्यानं प्रति गतः । मम गृहस्य समीपे एव उद्यानं अस्ति

तत्र एव सः गतः। पुष्पं आनयितुं सः इच्छति। तत्र वृक्षे शोभनं पुष्पं भवति। कथं सः पुष्पं आनयति? तत्र एकं अपि पुष्पं नास्ति।

सत्यस्य वचनं श्रेयः। धर्मस्य वचनं श्रेयः अस्ति न वा? धर्मस्य वचनात् धर्मस्य आचरणं एव श्रेयः। सदा हितं वचनं एव वदेत्। एतत् मम सत्यं युक्तं च मतं अस्ति। यत् अत्यंतं भूतहितं तत् एव सत्यं इति सः वदति। सत्यं एव धर्मः। धर्मः एव सत्यम्।

अहं मरणात् भीतः नास्मि, मम यशः न दूषितं भवति। सत्येन मम यशः शोभनं भवति।

तव पिता कुत्र अस्ति? मम पिता अत्र नास्ति। किं करोमि? कुत्र गच्छामि? कुत्र गमनं इदानीं श्रेयः अस्ति? वद, शीघ्रं वद।

संधि किये हुए वाक्य।

यदि स मनुष्य इदानीमेव खादितुं नेच्छति, तर्हि तस्मै न देहि। क इदानीं मोदकं खादितुमिच्छति? यथा त्वमिच्छसि तथा कुरु। सत्यमेव धर्मः। अहं मरणाद्भीतो नास्मि, मम यशो न दूषितं भवति। तव पिता कुत्राऽस्ति? मम पिताऽत्र नास्ति। कुत्र गमनमिदानीं श्रेयोऽस्ति?

पाठ ५

शब्द ।

तडागः– तालाव	आरोहति– (वह) चढता है
वृक्षः– वृक्ष	आरोहसि– (तू) ,, ,,
अश्वः– घोडा	आरोहामि–(मैं) चढता हूं।
वृषभः– बैल	आरोढुं– चढनेके लिये
वत्सः– बछडा	आरूढः– चढा हुआ
देशः– देश	गंधः– सुगंध

संस्कृत वाक्य ।

१ तस्य तडागस्य समीपे एकः वृक्षः अस्ति । २ तस्य तडागस्य जले शोभनं रक्तं कमलं अस्ति ३ तत् रक्तं कमलं अधुना अत्र आनय । ४ स भूपः इदानीं अश्वं आरोहति । ५ तस्य सेवकः उष्ट्रं आरोहति । ६ तस्य देशस्य अयं राजा धार्मिकः आस्ति ।

भाषा–वाक्य ।

१ उस तालावके समीप एक वृक्ष है । २ उस तालावके जलमें सुंदर लाल कमल है । ३ वह लाल कमल तू इस समय यहां ला। ४ वह राजा अब घोडेपर चढता है। ५ उसका सेवक ऊंटपर चढता है । ६ उस देशका यह राजा धार्मिक है ।

अब इन संस्कृत वाक्योंके भाषावाक्य बनाइये—

संस्कृत-वाचन-पाठः ।

तव अश्वः कुत्र अस्ति ? मम अश्वः तस्य वृक्षस्य समीपे एव अस्ति । कस्य वृक्षस्य समीपम् ? तत्र उद्याने यः वृक्षः अस्ति तस्य समीपं मम अश्वः इदानीं अस्ति । तत्र अनेन मार्गेण गच्छ, पश्य च तं अश्वं तत्र । तव अश्वस्य कः वर्णः अस्ति ? मम अश्वस्य श्वेतः वर्णः अस्ति । तर्हि श्वेतवर्णः अश्वः तस्मिन् उद्याने इदानीं नास्ति एव । कुत्र गतः केन वा नीतः न जानामि ।

निम्नलिखित भाषावाक्योंके संस्कृत वाक्य बनाइए ।

भाषा-वाक्य ।

बछडा कहां है ? बछडा अब वहां है । फूलकी सुगंध कैसी है ? फूलकी सुंगध उत्तम है । तू घोडेपर चढना चाहता है ? नहीं, मै ऊंटपर चढना चाहता हूं । इस देशमें तू आ । मैं वहां जाता हूं । अभी तू यहां पुस्तक लेकर आ । इस वृक्षका फल खा । वहां बैठ और ईश्वरकी शरण जा । मेरा देश अच्छा है । किसका देश सुन्दर है ? तेरी पुस्तक सुन्दर नहीं है ।

शब्द ।

पंडितः-पंडित	शूद्रः-शूद्र
ब्राह्मणः-ब्राह्मण	निषादः-निषाद
क्षत्रियः-क्षत्रिय	धर्मः-धर्म
वैश्यः-वैश्य	उपदेशकः-उपदेशक
उपदेशः-उपदेश	प्रवचनं-प्रवचन
श्रवणं-श्रवण, सुनना	भाषणं-भाषण
व्याख्यानं-व्याख्यान	कथनं-कहना

संस्कृत वाक्य ।

१ कः सः पंडितः ? २ यः तत्र व्याख्यानं करोति ? ३ तस्य उपदेशस्य श्रवणाय त्वं आगच्छसि किम् ? ४ तस्य धर्मप्रवचनं उत्तमम् । ५ किं तस्य भाषणं त्वया श्रुतम् ? ६ तस्मिन् नगरे यथा ब्राह्मणः तथा क्षत्रियः अपि अस्ति । ७ परंतु तत्र निषादः नास्ति । ८ तत्र धर्मस्य प्रवचनं कः करोति ? ९ पंडितः विष्णुमित्रः करोति ।

भाषावाक्य ।

१ कौन वह पंडित है? २ जो वहां व्याख्यान देता है? ३ उसके उपदेशको सुननेके लिये क्या तू आता है ? ४ उसका धर्मप्रवचन उत्तम है। ५ क्या उसका भाषण तूने सुना है? ६ उस शहरमें जैसा ब्राह्मण वैसा क्षत्रियभी है । ७ परंतु वहां निषाद नहीं है । ८ वहां धर्मका प्रवचन कौन करता है ? ९ पंडित विष्णुमित्र करता है ।

संस्कृत--वाचन-पाठः ।

मम बिडालः कुत्र अस्ति ? यत्र तव मोदकः अस्ति । तव मोदकस्य शोभनः गंधः आगच्छति । अतः एव तत्र तव मार्जारः गतः । त्वं मार्जारेण सह उद्यानं गच्छ । मार्जारः दुग्धं पिबति, अतः इदानीं उद्यानं आगन्तुं न इच्छति, तर्हि तं सायंकाले तत्र नय ।

त्वया तस्य वृक्षस्य पुष्पं न आनीतं किम् ? नहि । मया न आनीतम् । इदानीं सः पुष्पं आनयति ।

मम अश्वः रामचंद्रेण नीतः । स रामचंद्रः कदा अत्र आगमिष्यति ? तस्मात् नगरात् कदा स आ-गमिष्यति ? सः अश्वं आरोहति किम् ? यथा त्वं अश्वं आरोहसि तथा एव सः अपि अश्वं आरोहति ।

निषादः वने भवति । शूद्रः नगरे भवति । तथा ब्राह्मणः कुत्र भवति ? त्वं धर्मं जानासि किम् ? निषादः धर्मं न जानाति । पंडितः धर्मस्य वचनं जानाति एव ।

संधि किये हुए वाक्य ।

मम बिडालः कुत्राऽस्ति ? यत्र तव मोदकोऽस्ति । तव मोदकस्य शोभनो गन्ध आगच्छति । अत एव तत्रैव मार्जारो गतः । त्वं मार्जारेण सहोद्यानं गच्छ ।

पाठ ६

अब इस पाठमें आप कुछ श्लोक पढिये—

दुःखादुद्विजते सर्वः सर्वस्य सुखमीप्सितम् ॥

महाभारत शांति. १३९।६१

पद–दुःखात्। उद्विजते। सर्वः। सर्वस्य। सुखं। ईप्सितम्॥

अन्वय–सर्वः दुःखात् उद्विजते। सर्वस्य सुखं ईप्सितम् ॥

अर्थ–सब दुःखसे दुःखी होते हैं। सबको सुख ही इष्ट है।

यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।

तृष्णाक्षयसुखस्यैते कलां नाऽर्हन्ति षोडशीम् ॥

महाभारत शांति. १७४।४८

पद–यत्। च। काम+सुखं। लोके। यत्। च। दिव्यं। महत्। सुखम्। तृष्णा+क्षय+सुखस्य। एते। कलां। न। अर्हन्ति। षोडशीम् ॥

अन्वय–लोके यत् काम+सुखं, यत् च दिव्यं महत् सुखं, एते तृष्णा+क्षय+सुखस्य षोडशीं कलां न अर्हन्ति ॥

अर्थ–लोकमें जो कामका सुख है और जो बडा दिव्य सुख है, ये (तृष्णा--क्षय--सुखस्य) इच्छाके नाशके सुखके (षोडशीं) सोलहवें (कलां) भाग की भी (न अर्हन्ति) योग्यता नहीं रखते।

प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते।

काष्ठान्यपि हि जीर्यन्ति दरिद्राणां च सर्वशः ॥

महाभारत उद्योग. ३४।५१

पद--प्रायेण। श्रीमतां। लोके। भोक्तुं। शक्तिः। न विद्यते। काष्ठानि। अपि। हि। जीर्यन्ति। दरिद्राणां। च सर्वशः॥

अन्वय-लोके प्रायेण श्रीमतां भोक्तुं शक्तिः न विद्यते। दरिद्राणां च सर्वशः काष्ठानि अपि हि जीर्यन्ति॥

अर्थ--जगत्‌में (प्रायेण) बहुधा श्रीमानोंमें (भोक्तुं) भोग भोगनेकी शक्ति नहीं (विद्यते) होती है। परंतु दरिद्रोंको सब (काष्ठानि) लकडियां भी (जीर्यन्ति) हजम हो जाती हैं।

अर्थात् धनी मनुष्य उत्तम अन्नको भी पचा नहीं सकता। परंतु दरिद्री मनुष्यको, लकडियां खानेपर भी हजम हो जाती हैं।

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।
एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः॥

मनुस्मृति ४।१६०

पद--सर्वं। पर+वशं। दुःखं। सर्वं। आत्म+वशं। सुखं। एतत्। विद्यात्। समासेन। लक्षणं। सुख--दुःखयोः।

अन्वय--पर+वशं सर्वं दुःखं। आत्म+वशं सर्वं सुखं। समासेन सुख+दुःखयोः एतत् लक्षणं विद्यात्॥

अर्थ--(पर+वशं) दूसरेके आधीन होना सब दुःख है और अपने आधीन होना सब सुख है। (समासेन) सारांशसे सुख और दुःखका (एतत्) यह लक्षण (विद्यात्) जान ले। पराधीनता दुःख और स्वाधीनता सुख है।

पाठ ८

सुखं वा यदि वा दुःखं प्रियं वा यदि वाऽप्रियम्।
प्राप्तं प्राप्तमुपासीत हृदयेनाऽपराजितः ॥

म० भारत शांति० ॥ २५।२६

पद--सुखं। वा। यदि। वा। दुःखं। प्रियं। वा। यदि। वा। अप्रियं। प्राप्तं। प्राप्तं। उपासीत। हृदयेन। अपराजितः।

अन्वय-- सुखं वा यदि वा दुःखं, प्रियं वा यदि वा अप्रियं, प्राप्तं प्राप्तं हृदयेन अपराजितः उपासीत।

अर्थ--सुख किंवा दुःख, प्रिय किंवा अप्रिय जो प्राप्त होवे, उसको हृदयसे पराजित न होते हुए (उपासीत) स्वीकार करे।

सुख दुःख, प्रिय अप्रिय जो भी कुछ प्राप्त हो, उसको स्वीकार करता जाय, परंतु कभी हृदय उत्साहहीन न बनावे।

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥

मनुस्मृति २।१२

पद--वेदः। स्मृतिः। सत् + आचारः। स्वस्य। च। प्रियं। आत्मनः। एतत्। चतुर्विधं। प्राहुः। साक्षात्। धर्मस्य। लक्षणम्

अन्वय--वेदः, स्मृतिः, सदाचारः, स्वस्य आत्मनः प्रियं च, एतत् चतुर्विधं, धर्मस्य साक्षात् लक्षणं प्राहुः।

अर्थ-- श्रुति, स्मृति, सत्पुरुषोंका आचार तथा अपने

आत्माका प्रियाचरण यह (चतुर्-विधं) चार प्रकारका धर्मका (साक्षात्) प्रत्यक्ष लक्षण है ऐसा (आहुः) कहते हैं।

पाठक इन श्लोकोंको बार बार पढें, इतनी बार पढें कि अंतमें श्लोक पढते ही उसका अर्थ ध्यानमें आजावे। इस रीतिसे पाठक पढते जायंगे, तो एक वर्षमें रामायण महाभारत समझने योग्य संस्कृत उनको आसकती है।

संधि किये हुए वाक्य।

तडागस्य समीप एको वृक्षोऽस्ति। जले शोभनं रक्तं कमलमस्ति। तद्रक्तं कमलं त्वमधुनात्रानय। स भूप इदानीमश्वमारोहति। तस्य सेवक उष्ट्रमारोहति। तस्य देशस्यायं राजा धार्मिकोऽस्ति।

तवाश्वः कुत्रास्ति? ममाश्वस्तस्य वृक्षस्य समीपमेवास्ति। तत्रोद्याने यो वृक्षोऽस्ति तस्य समीपं ममाश्व इदानीमस्ति। तत्रानेन मार्गेण गच्छ, पश्य च तमश्वं तत्र। तवाश्वस्य को वर्णोऽस्ति? ममाऽश्वस्य श्वेतो वर्णोऽस्ति। तर्हि श्वेतवर्णोऽश्वस्तास्मिन्नुद्यान इदानीं नास्त्येव। कुत्र गतो वा केन नीतो वा न जानामि।

कः स पण्डितः? यस्तत्र व्याख्यानं करोति। तस्योपदेशस्य श्रवणाय त्वमागच्छसि किम्? तस्य धर्मप्रवचनमुत्तमम्। तस्मिन्नगरे यथा ब्राह्मणस्तथा क्षत्रियोऽप्यस्ति। स रामचंद्रः कदात्रागमिष्यति?

पाठ ९

इस पाठमें निम्नलिखित शब्द स्मरण कीजिये—

शब्द ।

पितृव्यः— चचा	पालकः— पालनेवाला
पुत्रः— पुत्र	मातुलः— मामा
जनकः— पिता	मातामहः— माताका पिता;
पितामहः— पिताका पिता, दादा ।	याजकः— यज्ञ करनेवाला
प्रपितामहः—दादाका पिता	संयोगः— संयोग
मूषकः— चूहा	वसति— वसता है
	वत्स्यति— रहेगा

इन शब्दोंका उपयोग करके अब वाक्य बनाइये—

संस्कृत वाक्य ।

१ तव पितृव्यः कुत्र अस्ति इदानीम् ? २ मम पितृव्यः इदानीं उद्यानं गतः । ३ तस्य मातुलः कदा अत्र आगमिष्यति ? ४ तव पुत्रः मम गृहं गत्वा पितामहस्य गृहं गमिष्यति । ५ तस्य जनकः इदानी अत्र एव अस्ति । ६ तव मातुलः तस्य जनकः अस्ति । ७ तव जनकः तस्य पितृव्यः भवति । ८ स याजकः तत्र यज्ञं करोति ।

भाषा वाक्य ।

१ तेरा चचा कहां है अब ? २ मेरा चचा अब बागमें गया

है। ३ उसका मामा कब यहां आवेगा? ४ तेरा पुत्र मेरे घर जाकर दादाके घर जायगा। ५ उसका पिता अब यहां ही है। ६ तेरा मामा उसका पिता है। ७ तेरा पिता उसका चचा होता है। ८ वह याजक वहां यज्ञ करता है।

संस्कृत--वाचन--पाठः।

स तत्र दुग्धं पिबति। तव पितामहः अद्य किं करोति? मम पितामहः इदानीं दुग्धं न पिबति। याजकः यज्ञं करोति। अहं जलं पास्यामि। तव मातामहः इदानीं जलं नैव पास्यति। सः अन्नं भक्षयति। अहं अन्नं भक्षयामि जलं च पिबामि। यत्र मार्जारः अस्ति तत्र मूषकः अपि अस्ति। त्वं कदापि दण्डं न पश्यसि। अहं इदानीं तव दण्डं न पश्यामि। कुमारः बहु धावति। स ब्राह्मणः कुत्र अस्ति?

यज्ञस्य समीपं स इदानीं गतः। तस्य कः अपराधः? तेन किं कृतम्? वानरः वृक्षस्य उपरि वसति। वेदे यत् ज्ञानं अस्ति, तत् किं त्वं जानासि? अहं तत् जानामि। त्वया ज्ञातं चेत् कथय। जलस्य पानं कर्तुं इच्छसि किम्? तडागस्य समीपं एकः वृक्षः अस्ति, तं पश्य।

पाठ १०

अब निम्नलिखित शब्द कण्ठस्थ कीजिये—

शब्द।

आश्रमः—आश्रम	देहः—शरीर
नागः—सांप	तापः—गर्मी, धूप
याचकः—मांगनेवाला	दुर्गः—किला
वायसः—कौवा	कोपः—क्रोध
शुकः—तोता	रागः—प्रीति

संस्कृत वाक्य।

१ कण्वस्य आश्रमः कुत्र अस्ति? २ आचार्यस्य कण्वस्य आश्रमः तस्मिन् वने अस्ति। ३ तस्मिन् वृक्षे वायसः अस्ति परंतु शुकः नास्ति। ४ सूर्यस्य तापः अद्य बहु भवति। ५ तस्य शोभनः देहः अस्ति। ६ तस्य नृपस्य एषः दुर्गः अस्ति। ७ तस्य आश्रमे एकः शिष्यः पठति।

भाषा वाक्य।

१ कण्वका आश्रम कहां है? २ आचार्य कण्वका आश्रम उस वनमें है। ३ उस वृक्षमें कौआ है परंतु तोता नहीं है। ४ सूर्यकी उष्णता आज बहुत है। ५ उसका उत्तम शरीर है। ६ उस राजका यह किला है। ७ उसके आश्रममें एक शिष्य पढता है।

संस्कृत—वाचन—पाठः।

ब्राह्मणः प्रथमः वर्णः। क्षत्रियः द्वितीयः वर्णः।

वैश्यः तृतीयः वर्णः। शूद्रः चतुर्थः वर्णः। निषादः पंचमः। स पंडितः धर्मस्य उपदेशं करोति। त्वं किं वदसि? पंडितस्य वचनं धर्मवचनं अस्ति। यथा वृक्षस्य पत्रं तथा एव पुस्तकस्य अपि पत्रं अस्ति। तव भाषणं मधुरं अस्ति परंतु न तथा तस्य भाषणं मधुरं भवति। सर्वस्य मनुष्यस्य सुखं ईप्सितम्। यदा बलभद्रः तत्र गच्छति तदा रामचन्द्रः अपि गच्छति एव। तव कोपस्य किं कारणम्? यथा सूर्यः तपति न तथा सोमः। सूर्यः उष्णः, सोमः शांतः। सूर्यस्य प्रकाशः तस्य गृहे नास्ति एव। स शोभनः स्वर्गः। कदा त्वं तेन मार्गेण गमिष्यसि? अहं सदा तेनैव मार्गेण गमिष्यामि। तव पात्रं अत्र आनय।

संधि किये हुए वाक्य।

ब्राह्मणः प्रथमो वर्णः। क्षत्रियो द्वितीयो वर्णः। वैश्यस्तृतीयो वर्णः। शूद्रश्चतुर्थो वर्णः। स पंडितो धर्मस्योपदेशं करोति। पण्डितस्य वचनं धर्मवचनमस्ति। यथा वृक्षस्य पत्रं तथैव पुस्तकस्यापि पत्रमस्ति। सर्वस्य मनुष्यस्य सुखमीप्सितम्। यदा बलभद्रस्तत्र गच्छति तदा रामचन्द्रोऽपि गच्छत्येव। यथा सूर्यस्तपति न तथा सोमः। सूर्यस्य प्रकाशस्तस्य गृहे नास्त्येव॥

पाठ ११

इस पाठमें आप निम्नलिखित शब्द स्मरण कीजिये—

शब्द ।

सैनिकः—सिपाही	मेघः—मेघ, बादल
सिंहः—सिंह, बबर, शेर	कपोतः—कबूतर
शृगालः—गीदड	पार्थिवः—राजा
अनर्थः—अनर्थ	प्रभावः—प्रभाव
ग्रंथः—पुस्तक	पराभवः—पराभव

संस्कृत वाक्य ।

१ पश्य सैनिकः तत्र अस्ति। २ स कस्मात् स्थानात् आगतः ? ३ स पूर्वदेशात् अत्र आगतः । ४ तव कपोतः अत्र नास्ति किम् ? ५ तस्य वीरस्य महान् प्रभावः । ६ त्वं तं ग्रंथं पठ । ७ आकाशे मेघः नास्ति। ८ मेघात् वृष्टिः भवति । ९ त्वं किं पठसि इदानीम्?

भाषा वाक्य ।

१ देख सिपाही वहां है । २ वह किस देशसे आया है? ३ वह पूर्वदेशसे यहां आया है। ४ तेरा कबूतर यहां नहीं है क्या ? ५ उस वीरका बडा प्रभाव है । ६ तू उस पुस्तकको पढ । ७ आकाशमें बादल नहीं है। ८ बादलसे वर्षा होती है। ९ तू क्या पढता है अब ?

संस्कृत-वाचन-पाठः ।

त्वं किं वदसि ? स किमपि नैव वदति । त्वं कुत्र पठसि ? तत्र सः पठति किम् ? नहि स तत्र किमपि न पठति । कः तत्र पठति ? वायुः आकाशे भवति । सोमः अंतरिक्षे भवति । सूर्यः रात्रौ कुत्र भवति ? सोमः इदानीं कुत्र अस्ति ? स मनुष्यः इदानीं अत्र किं न आगच्छति ? भूपः इदानीं स्नानाय गतः । त्वं अधुना दुग्धपानाय आगच्छसि किम् ? तस्य करे मम पुस्तकं अस्ति । देवदत्तस्य पुस्तकं शीघ्रं पठ । तस्मात् पुस्तकात् एकं पत्रं आनय । सः नगरात् नगरं सदा किमर्थं गच्छति । तत्र जलं नास्ति, तत्र न गच्छ । स धीरः पुरुषः इदानीं अत्र नास्ति । मम श्वेतः अश्वः अत्र आगच्छति । तव कृष्णः अश्वः कुत्र गतः ? वृक्षस्य कोमलं पत्रं पश्य । तत् कथं मनोहरं अस्ति ।

निम्नलिखित क्रियाएं अब स्मरण कीजिये—

धारयति-(वह)धारण करता है	क्रिडति-(वह) खेलता है
धारयसि-(तू)धारण करता है	क्रीडसि-(तू) खेलता है
धारयामि-(मैं)धारण करता हूं	क्रीडामि-(मैं) खेलता हूं
धारयिष्यति-धारण करेगा	क्रीडिष्यति-(वह) खेलेगा

भ्रामयति--(वह) घुमाता है	भ्रामयामि--(मैं) घुमाता हूं।
भ्रामयसि--(तू) घुमाता है	भ्रामयिष्यति-(वह)घुमावेगा

संस्कृत वाक्य।

१ ईश्वरः बलेन सर्वं जगत् धारयति। २ त्वं हस्तेन किं धारयसि ? ३ अहं सर्वं धारयामि। ४ देवः सर्वं जगत् भ्रामयति। ५ त्वं इदानीं किं न क्रीडसि? ६ तस्य पुत्रः श्वः क्रीडिष्यति किम् ? ७ स चक्रं नैव भ्रामयिष्यति। ८ स पुरुषः कुत्र इदानीं धावति? ९ त्वं किं न क्रीडिष्यसि? १० अहं अद्य एव क्रीडिष्यामि। ११ कुंभकारः चक्रं दंडेन इदानीं भ्रामयिष्यति। १२ त्वं भारं धारयिष्यसि किम् ? १३ त्वं अद्य सायं कुत्र क्रीडिष्यसि ?

भाषा वाक्य।

१ ईश्वर बलसे सब जगत् का धारण करता है। २ तू हाथसे क्या धारण करता है? ३ मैं सबका धारण करता हूं। ४ देव सारे जगत्को घुमाता है। ५ तू अब क्यों नहीं खेलता है ? ६ उसका पुत्र कल खेलेगा क्या? ७ वह चक्र नहीं घुमायेगा। ८ वह पुरुष अब कहां दौडता है ? ९ तू क्यों नहीं खेलेगा? १० मैं आजही खेलूंगा। ११ कुम्हार चक्रको दंडसे अब घुमायेगा। १२ तूं भार धारण करेगा क्या ? १३ तू आज शामको कहां खेलेगा ?

पाठ १२

अब इस पाठमें आपको कुछ संस्कृत श्लोकोंका परिचय करा देते हैं—

(१)

तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां नरः पंडित उच्यते ॥

महाभारत उद्योग० अ० ३३। ३२

पद--तत्त्व+ज्ञः। सर्व+भूतानां। योग+ज्ञः। सर्व+कर्मणां। उपाय+ज्ञः । मनुष्याणां । नरः । पंडितः उच्यते ॥

अन्वयः-- सर्व-भूतानां तत्त्व-ज्ञः । सर्व-कर्मणां योगज्ञः। मनुष्याणां उपाय-ज्ञः, पंडितः उच्यते ॥

अर्थ—सब भूतोंके तत्त्वको (ज्ञः) जाननेवाला, सब कर्मोंके (योग--ज्ञः) प्रयोगको जाननेवाला, मनुष्योंमें जो (उपाय--ज्ञः) उपाय जाननेवाला (नर) मनुष्य है [उसीको] पंडित (उच्यते) कहा जाता है ।

(२)

स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।
मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते ॥

महाभारत उद्योग० अ० ३३ । ३६

पद--स्वं। अर्थं। यः। परि+त्यज्य। पर+अर्थं। अनु+तिष्ठति। मिथ्या। चराति। मित्र+अर्थे। यः । च । मूढः । सः । उच्यते॥

अन्वयः—यः स्वं अर्थं परित्यज्य, परार्थं अनुतिष्ठति, यः च मित्रार्थे मिथ्या चरति, सः मूढः उच्यते ॥

अर्थ— जो (स्वयं) अपने (अर्थं) अभीष्ट कार्य को (परि—त्यज्य) छोडकर (पर--अर्थं) शत्रुके कार्यका (अ-नुतिष्ठति) अनुष्ठान करता है और जो (मित्र--अर्थे) मित्र के कार्य में (मिथ्या) झठा (चरति) चलता है वह मूढ (उच्यते) कहा जाता है ॥

३

अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चाऽऽरभते दुष्टं तमाहुर्मूढचेतसम् ॥

म० भारत उद्यो० अ० ३३।३८

पद--अ+मित्रं । कुरुते । मित्रं । मित्रं । द्वेष्टि । हिनस्ति । च । कर्म । च । आरभते । दुष्टं । तं आहुः । मूढ --चेतसम् ॥

अन्वय-- अमित्रं मित्रं कुरुते । मित्रं द्वेष्टि च हिनस्ति । च दुष्टं कर्म आरभते । तं मूढ -- चेतसं आहुः ॥

अर्थ-- जो (अ–मित्रं) शत्रुको मित्र (कुरुते) करता है; मित्रसे (द्वेष्टि) द्वेष करता है और (हिनस्ति) उसका घात करता है; और (दुष्टं) दोषयुक्त कर्म (आरभते) आरंभ करता है, उसको (मूढ+ चेतसं) मूढ बुद्धिवाला (आहुः) कहते हैं ।

पाठ १३

एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥

महाभारत उद्योग० ३३।५३

पद्- एकः । क्षमा+वतां । दोषः । द्वितीयः । न । उपपद्यते । यत् । एनं । क्षमया । युक्तं । अ + शक्तं । मन्यते । जनः॥

अन्वयः-- क्षमवतां एकः दोषः । द्वितीयः न उपपद्यते । यत् क्षमया युक्तं एनं जनः अशक्तं मन्यते ॥

अर्थ-- (क्षमा-वतां) क्षमा धारण करनेवालोंका एक ही दोष है । दूसरा नहीं (उपपद्यते) होता है । (यत्) क्योंकि (क्षमया) क्षमासे युक्त (एनं) इस पुरुषको (जनः) लोग अशक्त (मन्यते) मानते हैं ॥

सोऽस्य दोषो न मंतव्यः क्षमा हि परमं बलम् ॥
क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ॥

म० भा० उद्योग० । ३३।५४

पद्-सः । अस्यः । दोषः । न । मंतव्यः । क्षमा । हि । परमं । बलं । क्षमा । गुणः । हि । अ+शक्तानां । शक्तानां । भूषणं । क्षमा ॥

अन्वय-- अस्य सः दोषः न मंतव्यः । हि क्षमा परमं बलम् । हि अशक्तानां गुणः क्षमा । शक्तानां क्षमा भूषणम् ॥

अर्थ-- (अस्य) इसका वह दोष नहीं (मंतव्यः) मानना चाहिये (हि) क्यों कि क्षमा (परमं) श्रेष्ठ बल [है ।] क्यों कि अशक्तोंका गुण क्षमा [और] (शक्तानां) बलिष्ठोंका क्षमा भूषण है ।

इस प्रकार आप कई सुगम श्लोक पढकर समझ सकते हैं। श्लोकोंके पद कैसे बने और पदोंसे अन्वय कैसा हुआ,इसकी ओर ध्यान रखते जाइये। तो अर्थ समझना सुगम होगा। शब्द आपको आते होंगे तो अर्थ आपके ध्यानमें आजायगा। श्लोक के पद और पदोंका अन्वय करना ही विशेष कठिन है। परंतु यह आपके लिये थोडी देरीके पश्चात् ही सुगम हो जायगा।

संधि किये हुए वाक्य ।

ईश्वरो बलेन सर्वं जगद्धारयति। त्वं हस्तेन किं धारयस्यहं सर्वं धारयामि। देवः सर्वं जगद्भ्रामयति। त्वमिदानीं किं न क्रीडसि? स पुरुषः कुत्रेदानीं धावति? अहमद्यैव क्रीडिष्यामि। कुंभकारश्चक्रं दण्डेनेदानीं भ्रामयिष्यति। त्वमद्य सायं कुत्र क्रीडिष्यसि? वायुराकाशे भवति। सोमोऽन्तरिक्षे भवति। सोम इदानीं कुत्रास्ति? स मनुष्य इदानी-मत्र किमर्थं नागच्छति।

पाठ १४

अब निम्नलिखित वाक्य पढिये। यदि पिछला पाठ आपका ठीक हुआ है, तो आपको ये वाक्य पढते ही समझमें आवेंगे।

स पुरुषः पंडितः अस्ति।

सः तत्त्वज्ञः योगज्ञः उपायज्ञः च अस्ति।

यः स्वं अर्थं न जानाति।

सः कदापि पंडितः न भवति।

यः मित्रस्य अर्थे मिथ्या वदति।

सः नरः शोभनः न भवति।

यः मूढः जनः अस्ति स पंडितः कथं भवति?

पंडितः प्रातःकाले शीतेन जलेन स्नानं करोति।

मूढः मध्याह्ने अपि स्नानं न करोति।

यः अमित्रं मनुष्यं मित्रं करोति सः चतुरः।

यः मित्रं अमित्रं करोति सः मूढः।

यः पुरुषः स्वमित्रं द्वेष्टि स मूढः।

सः कदापि स्वमित्रं न द्वेष्टि।

सः तं हिनस्ति। मूढः मनुष्यः मित्रं हिनस्ति।

सः दुष्टं कर्म अधुना आरभते।

तस्य एक एव दोषः अस्ति, न मम।

तव कः दोषः? मम न कः अपि दोषः।

स तस्य एव दोषः तत्र मम कः अपि दोषः नास्ति।
तस्य एक एव दोषः न द्वितीयः ।
तस्य एकं एव पुस्तकं अत्र अस्ति ।
मम एकं एव वस्त्रं तत्र अस्ति ।
तव एकं एव आभूषणं मम गृहे अस्ति ।
स बलिष्ठं अपि पुरुषं अशक्तं मन्यते ।
सः जनः अशक्तं अपि पुरुषं बलिष्ठं मन्यते ।
अस्य सः दोषः त्वया न मंतव्यः ।
तस्य सः दोष नास्ति किम् ?
अशक्तस्य गुणः क्षमा एव अस्ति ।
वीरस्य भूषणं क्षमा भवति ।
तस्य परमं बलं क्षमा एव अस्ति ।
यदा त्वं तत्र गमिष्यसि तदा तं पश्य ।
कः तस्य गुणः अस्ति ?
इदानीं स कुत्र अस्ति ?
अत्र न अस्ति किम् ?
तस्य ज्ञानं एव बलं अस्ति ।
तस्य पुस्तकं कुत्र अस्ति ?
यत्र तस्य वस्त्रं अस्ति तत्र एव पुस्तकं अस्ति ।
त्वं तस्य वृक्षस्य शोभनं फलं खादसि किम् ?
अहं वृक्षस्य शोभनं फलं खादामि ।

पाठ १५

स मूढः मनुष्यः तत्र किं करोति ?

पश्य अस्य वृक्षस्य शोभनं पत्रम् ।

अद्य सूर्यस्य शोभनः प्रकाशः अस्ति ।

त्वं पंडितः असि किम् ?

त्वं इदानीं एव कुत्र गच्छसि ?

स प्रातः एव कुत्र धावति ?

तव पुत्रः इदानीं एव किमर्थं धावति ?

यथा त्वं धावसि तथा सः अपि धावति ।

यथा विष्णुमित्रः वदति तथा गणेशः अपि वदति ।

गणेशस्य गृहं कुत्र अस्ति ?

कानपूरनगरे पंडितस्य गणेशस्य गृहं अस्ति ।

कथं पंडितः गणेशदत्तः वदति ?

यत्र पंडितः गणेशदत्तः गच्छति तत्र एव पंडितः गोपालः अपि गच्छति। स इदानीं हरद्वारं प्रति गतः । त्वं कुत्र इदानीं एव गच्छसि ?

यत्र फलं भवति तत्र अन्नं जलं च भवति ।

यत्र जलं न भवति तत्र अन्नं भवति किम् ?

यत्र जलं नास्ति तत्र अन्नं न एव भवति ।

तस्मिन् कूपे जलं नास्ति किम् ?

तस्मिन् कूपे इदानीं प्रभूतं जलं अस्ति ।

तस्य गृहे धनं नास्ति, परंतु अन्नं अस्ति ।

तव गृहे अन्नं नास्ति, परंतु धनं अस्ति ।

मम गृहे अन्नं अस्ति, तथा धनं च अपि अस्ति ।

तस्य पुत्रः इदानीं एव मम पुस्तकं पठति ।

तव पुत्रः इदानीं किं न पठति ?

त्वं मूढः न असि । सः मूढः नास्ति ।

अहं न मूढः अस्मि, परंतु अहं पंडितः अस्मि ।

विष्णुमित्रः इदानीं अत्र पत्रं लिखति ।

देवदत्तः कदापि पत्रं न लिखति ।

यज्ञसेनः वने किं करोति ?

त्वं नगरे किं करोषि ? वद इदानीं एव ।

कथं स शीघ्रं एव युक्तं वदति ।

तथा त्वं न शीघ्रं शोभनं च वदसि ।

यथा त्वं वदसि तथा अहं अपि वदामि ।

रामचंद्रः सदा एव सत्यं वदति ।

भूमित्रः कदापि मिथ्या न वदति ।

स सर्वदा एव मिथ्या न वदति ।

स अद्य वृक्षात् फलं न आनयति ।

इस ढंगसे आप अनेक वाक्य बना सकते हैं और बोल तथा लिख सकते हैं । इस रीतिसे वाक्य बनाने योग्य आपका अभ्यास अब हुआ है ।

पाठ १६

निम्नलिखित शब्द अब स्मरण कीजिये—

उद्यमः—उद्योग	ओष्ठः—होंठ
पुरुषार्थः—पुरुषार्थ	आतपः—धूप, सूर्यप्रकाश
द्विरेफः—भ्रमर	प्रवाहः—प्रवाह
चातकः—चातकपक्षी	तरंगः—लहर, तरंग
वर्णः—रंग, वर्ण	कपोलः—गाल
स्तेनः—चोर	स्नेहः—मित्रता
ब्राह्मणः—ब्राह्मण	व्याधः—शिकारी

संस्कृत वाक्य।

१ हे मनुष्य! त्वं सदा उद्यमं कुरु। २ स वीरः पुरुषः सदा पुरुषार्थं करोति। ३ द्विरेफः तस्मिन् पुष्पे इदानीं अस्ति। ४ पश्य, कथं स तस्मात् पुष्पात् अत्र आगच्छति। ५ व्याधः वने व्याघ्रं पश्यति। ६ मेघं दृष्ट्वा चातकः शब्दं करोति॥

भाषा वाक्य।

१ हे मनुष्य! तू सदा उद्योग कर। २ वह वीर पुरुष सदा पुरुषार्थ करता है। ३ भ्रमर उस फूलमें अब है। ४ देख वह उस फूलसे यहां कैसे आता है। ५ शिकारी वनमें शेर को देखता है। ६ मेघको देखकर चातक शब्द करता है॥

संस्कृत-वाचन-पाठः ।

तस्मै ब्राह्मणाय प्रभूतं जलं देहि । यदा रामभद्रः नगरं गच्छति, तदा त्वं अपि तत्र गच्छ । नोचेत् अहं तत्रैव आगमिष्यामि। त्वं अत्र आगच्छ अथवा अहं तत्र गच्छामि । त्वं इदानीं एव नगरात् चन्दनं अत्र आनय । सः तस्य गृहात् गोदुग्धं तत्र नयति । तव कपोलः शोभनः अस्ति । न तथा तस्य । अत्र जलस्य शोभनः प्रवाहः अस्ति । त्वं पश्यसि किम् ? पश्य सः व्याधः तत्र वने कथं धावति । किमर्थं स एवं तत्र धावति ? सूर्यस्य आतपे त्वं किं न गच्छसि? तस्य मनुष्यस्य कृष्णः वर्णः अस्ति । यः पुरुषार्थं करोति, स एव धनं प्राप्नोति। तव मित्रं ब्राह्मणः इदानीं कुत्र अस्ति ? यदा स गृहं गच्छति तदा एव स उद्यमं करोति ॥ तस्य वस्त्रं त्वया कुत्र रक्षितम् ? तस्य वस्त्रं मया अत्र रक्षितं, तथा च तस्य चक्रं अपि अत्रैव रक्षितम् ।

शब्द ।

दीपः– दीप, दीया	ज्वलति (वह) जलता है ।
शिष्यः– शिष्य	खनति--(वह) खोदता है ।
बुधः– ज्ञानी	आरोहति--(वह) चढता है।
अलंकारः-- आभूषण	जानाति--(वह) जानता है।
दासः–दास, नौकर	पालयति--पालन करता है ।

पाठ १७

संस्कृत वाक्य ।

१ तत्र दीपः ज्वलति । २ वानरः वृक्षं आरोहति । ३ वीरः अश्वं आरोहति । ४ दासः गर्दभं आरोहति । ५ शिष्यः अत्र खनति । ६ हे नर ! कथय, तत्र दीपः ज्वलति न वा ? ७ इदानीं कः वृक्षं आरोहति? ८ त्वं तत् जानासि किं, यत् त्वं पठसि? ९ बुधः सर्वं जानाति । १० यत्र गृहं अस्ति, तत्र उद्यानं अपि भवति किम् ?

भाषा वाक्य ।

१ वहां दीप जलता है । २ बंदर वृक्षपर चढता है । ३ वीर घोडेपर चढता है । ४ दास गधेपर चढता है । ५ शिष्य यहां खोदता है । ६ हे मनुष्य ! कह, वहां दीप जलता है वा नहीं ? ७ अब कौन वृक्षपर चढता है ? ८ तू जानता है क्या, जो तू पढता है? ९ ज्ञानी सब जानता है। १० जहां घर होता है, क्या वहां बाग भी होता है ?

संस्कृत--वाचन--पाठः ।

स यज्ञदत्तः अयोध्यानगरं गच्छति । इदानीं स तत्र किमर्थं गच्छति ? स तत्र किमर्थं गच्छति इति अहं न जानामि। त्वं जानासि किम् ? स उद्यानात् पुष्पं आनयति । इदानीं मध्याह्नसमयः जातः ।

तर्हि भोजनं कुरु । यदा सायंकालः भविष्यति तदा सायंसंध्यां कुरु । अहं तत्र गमिष्यामि परंतु भोजनं नैव भक्षयिष्यामि । यथा मनुष्यः गृहे अन्नं भक्षयति यथा एव वानरः वृक्षस्य फलं वने खादति । यदा यदा त्वं अत्र आगच्छसि, तदा तदा अहं पुस्तकं पठामि । ब्राह्मणाय फलं देहि । क्षत्रियाय शस्त्रं देहि । वैश्याय धनं देहि । शूद्राय अन्नं देहि । वनस्य रक्षकः वनपः अस्ति । द्वारस्य रक्षकः द्वारपः भवति । तथा एव गृहस्य पालकः गृहपः भवति । क्षेत्रस्य पालकः क्षेत्रपः भवति तथैव रथस्य रक्षकः रथपः भवति। मम दासं अत्र आनय । स इदानीं तत्र भूमिं खनति । किमर्थं स तत्र खनति ? अन्नलाभाय खनति ।

संधि किये हुए वाक्य ।

स यज्ञदत्तोऽयोध्यानगरं गच्छति । स तत्र किमर्थं गच्छतीत्यहं न जानामि । स उद्यानात्पुष्पमानयति । इदानीं मध्याह्नसमयो जातः । यथा मनुष्यो गृहेऽन्नं भक्षयति तथैव वानरो वृक्षस्य फलं वने खादति । यदा यदा त्वमत्रागच्छसि तदा तदाहं पुस्तकं पठामि । वनस्य रक्षको वनपोऽस्ति । द्वारस्य रक्षको द्वारपो भवति । तथैव गृहस्य पालको गृहपो भवति ।

पाठ १८

अब इस पाठमें कुछ श्लोक दिये जाते हैं।

शमीको नाम राजेन्द्र वर्तते विषये तव।
ऋषिः परमधर्मात्मा दान्तः शान्तो महातपाः॥

म० भारत आदि० ४२। १७

पद—शमीकः। नाम। राजेन्द्र। वर्तते। विषये। तव। ऋषिः। परम-धर्मात्मा। दान्तः। शांतः। महातपाः।

अन्वयः—हे राजेन्द्र! शमीकः नाम परम-धर्मात्मा दान्तः शांत महातपाः ऋषिः तव विषये वर्तते।

अर्थ—हे (राजा+इन्द्र) राजाओंमें श्रेष्ठ! शमीक नामक बडा धर्मात्मा (दान्तः) इंद्रियदमन करनेवाला, शांत, बडा तपस्वी ऋषि तेरे (विषये) राज्यमें (वर्तते) रहता है।

तस्य त्वया नरव्याघ्र सर्पः प्राणैर्वियोजितः।
अवसक्तो धनुष्कोट्या स्कन्धे मौनान्वितस्य च॥

महाभारत आदि० ४२। १८

पद—तस्य। त्वया। नरव्याघ्र। सर्पः। प्राणैः। वियोजितः। अवसक्तः। धनुष्कोट्या। स्कन्धे। मौनान्वितस्य। च॥

अन्वयः—हे नरव्याघ्र! त्वया मौनान्वितस्य तस्य स्कन्धे प्राणैः वियोजितः सर्पः धनुष्कोट्या अवसक्तः।

अर्थ—हे (नर-व्याघ्र) मनुष्योंमें श्रेष्ठ! तूने (मौन+अन्वि-

तस्य) मौनव्रत धारण किए हुए उस ऋषिके (स्कन्धे) कन्धेपर प्राणोंसे (वि-योजितः) वियुक्त अर्थात् मृत सर्पको (धनुष्-कोट्या) धनुष्यकी कोटीसे (अवसक्तः) लपेट दिया।

क्षान्तवांस्तव तत्कर्म पुत्रस्तस्य न चक्षमे
तेन शप्तोऽसि राजेन्द्र पितुरज्ञातमद्य वै ॥

म० भारत आदि० ४२।१९

पद—क्षान्तवान् । तव । तत् । कर्म । पुत्रः । तस्य । न । चक्षमे । तेन । शप्तः। असि । राजेन्द्र । पितुः । अज्ञातं। अद्य । वै।

अन्वयः- हे राजेन्द्र ! (सः) तव तत् कर्म क्षान्तवान्। तस्य पुत्रः न चक्षमे। तेन अद्य पितुः अज्ञातं वै शप्तः असि।

अर्थ- हे (राजा+इन्द्र) राजाओंमें श्रेष्ठ ! उसने तेरा वह कर्म (क्षान्तवान्) सहन किया ! परन्तु उसके पुत्रने (न चक्षमे) नहीं क्षमा की। उसने आज पिताके (अ-ज्ञातं) न जानते हुएही (शप्तः असि) तुझे शाप दिया है ॥

तत्र रक्षां कुरुष्वेति पुनः पुनरथाऽब्रवीत्।
तदन्यथा न शक्यं च कर्तुं केनचिदप्युत ॥

पद—तत्र । रक्षां। कुरुष्व । इति । पुनः । पुनः। अथ । अब्रवीत् । तत् । अन्यथा । न । शक्यं । च । कर्तुं । केन । चित् । अपि । उत ॥

अन्वयः---तत्र रक्षां कुरुष्व इति पुनः पुनः अथ अब्रवीत् उत केन चित् अपि च तत् अन्यथा कर्तुं न शक्यम् ॥

अर्थ--- (तत्र) उस विषयमें रक्षा (कुरुष्व) कर (इति) ऐसा (पुनः पुनः) बार बार (अथ) और वह (अब्रवीत्) कहने लगा। परंतु किससे भी वह (अन्यथा) दूसरी प्रकार (कर्तुं) करना शक्य नहीं ।

नहि शक्नोति तं यन्तुं पुत्रं कोपसमन्वितम् ।
ततोऽहं प्रेषितस्तेन तव राजन्हितार्थिना ॥

म० भारत आ० ४२ । २२

पद---न । हि । शक्नोति । तं । यन्तुं । पुत्रं । कोप-समन्वितं । ततः । अहं । प्रेपितः । तेन । तव । राजन् । हितार्थिना ॥

अन्वयः---हे राजन्! हि कोपसमन्वितं तं पुत्रं यन्तुं न शक्नोति । ततः तव हितार्थिना तेन अहं प्रेपितः ।

अर्थ--हे राजन् ! क्योंकि (कोप+समन्वितं) क्रोधसे युक्त उस पुत्र को (यन्तुं) शांत करनेके लिये वह (न शक्नोति) समर्थ नहीं है, इसलिये तेरे (हित--अर्थिना) हितकी इच्छा करनेवाले उस ऋषिने मुझे (प्रेपितः) भेजा है ।

इन श्लोकोंकी सरल संस्कृत यह है--

हे राजेन्द्र ! शमीकः नाम परमधर्मात्मा शान्तः दान्तः महातपाः एकः ऋषिः तव विषये वर्तते ।

त्वया तस्य मौनव्रतस्य स्कंधे प्राणैः वियुक्तःसर्पः धनुष्कोट्या अवसक्तः। स ऋषिः तव तत् कर्म क्षान्तवान्। परंतु तस्य पुत्रः न चक्षमे। हे राजन्! तेन ऋषिपुत्रेण अद्य पितुः अज्ञातं एव त्वं शप्तः असि। इदानीं तत्र त्वं स्वरक्षां कुरुष्व इति पुनः पुनः त्वां स ऋषिः अब्रवीत्। तत् केन अपि अन्यथा कर्तुं न शक्यं इति च अपि अब्रवीत्।

यदि यह सरल संस्कृत पाठक समझ सकते हैं, तो उनकी प्रगति निःसंदेह उतनी हो चुकी है कि जितनी इतने पाठोंसे होनी चाहिये।

संधि किये हुए वाक्य।

हे राजेन्द्र! शमीको नाम परमधर्मात्मा शान्तो दान्तो महातपा एक ऋषिस्तव विषये वर्तते। त्वया तस्य मौनव्रतस्य स्कन्धे प्राणैर्वियुक्तः सर्पो धनुष्को-ट्याऽवसक्तः। स ऋषिस्तव तत्कर्म क्षान्तवान्। परन्तु तस्य पुत्रो न चक्षमे। राजंस्तेनर्षिपुत्रेणाद्य पितुरज्ञातमेव त्वं शप्तोऽसि। इदानीं त्वं स्वरक्षां कुरुष्वेति पुनःपुनस्त्वां स ऋषिरब्रवीत्। तत्केनाऽप्यन्यथा कर्तुं न शक्यमिति चाप्यब्रवीत्।

पाठ १९

निम्नलिखित क्रियाओंको स्मरण कीजिये--

शब्द ।

दीपयति-- प्रकाश करता है।	वपति-- बोता है ।
ध्यायति-- ध्यान करता है।	राजति-- प्रकाशता है ।
वांछति-- इच्छा करता है ।	रटति-- रटता है ।
वसति-- रहता है ।	रणति-- शब्द करता है ।
वहति-- उठाकर लेजाता है।	भणति-- बोलता है ।

संस्कृत वाक्य ।

१ देवदत्तः दीपं दीपयति । २ रात्रौ अहं अपि दीपं प्रकाशयामि । ३ परंतु सः रात्रौ अपि गृहे दीपं न प्रकाशयति, न च अग्निं दीपयति । ४ अहं सायं प्रातः ईश्वरं ध्यायामि ।

भाषा वाक्य ।

१ देवदत्त दीया जलाता है। २ रात्रीमें मैं भी दीपको प्रकाशित करता हूं। ३ परंतु वह रात्रीमें भी घरमें न दीया प्रकाशित करता है, और न अग्निको जलाता है । ४ मैं सायंकाल और प्रातःकाल ईश्वरका ध्यान करता हूं ।

निम्नलिखित भविष्यकालकी क्रियाएं अब देखिये--

दीपयिष्यति-- प्रकाशित करेगा।	वप्स्यति-- बोवेगा
ध्यास्यति--ध्यान करेगा।	राजिष्यति--प्रकाशित होगा।
वांछिष्यति--इच्छा करेगा।	रटिष्यति -- रटेगा।
वत्स्यति--रहेगा।	रणिष्यति-- बोलेगा।
वक्ष्यति-उठाकर ले जायगा।	भणिष्यति-- बोलेगा।
	करिष्यति-- करेगा।

पाठक पहिले वर्तमानकालके रूप और ये भविष्यकालके रूप परस्पर तुलना करके देख लें। और इसकी विशेषता का स्मरण रखें। इनके तीनों रूप " ति, सि, मि " लगकर पूर्व-वत् ही होते हैं, जैसा—

रटति -- वह रटता है	भणिष्यति-- वह बोलेगा
रटसि -- तू रटता है	भणिष्यसि-- तू बोलेगा
रटामि -- मैं रटता हूं	भणिष्यामि-- मैं बोलूंगा

अब इनके वाक्य देखिये—

१ सः पुरुषः भारं वहति। २ यथा स भारं वहति। तथा अहं न वहामि। ३ त्वं इदानीं किं भणसि? ४ स शब्दान् रटति। ५ त्वं किं पठसि? ६ अहं संस्कृत-पाठमालां पठामि। ७ दीपं दीपय, तं अत्र आनय च। ८ कृषीवलः बीजं वपति। ९ अहं अपि तथैव बीजं वप्स्यामि। १० यथा त्वं बीजं वपसि तथा स न वपति। ११ रामेश्वरः गृहे वसति। १२ मुनिः वने वसति।

१ वह मनुष्य बोझ उठाता है। २ जैसा वह बोझ उठाता है वैसा मैं नहीं उठाता हूं। ३ तू अब क्या बोलता है? ४ वह शब्दों को रटता है। ५ तू क्या पढता है? ६ मैं संस्कृत-पाठमाला पढता हूं। ७ दीप जला और उसे यहां ला। ८ किसान बीज बोता है। ९ मैं भी वैसाही बीज बोऊंगा। १० जैसा तू बीज बोता है वैसा वह नहीं बोता। ११ रामेश्वर घरमें रहता है। १२ मुनि वनमें रहता है।

हे मित्र! त्वं किं वाञ्छसि? अहं पठितुं इच्छामि। किं अत्रैव पठितुं इच्छसि अथवा काशीक्षेत्रे पठिष्यसि? अहं व्याकरणशास्त्रं अत्र पठिष्यामि तथा च न्यायशास्त्रं काशीनगरं गत्वा तत्र कस्य अपि बुधस्य समीपे स्थित्वा पठिष्यामि। यथा राजा स्वनगरे वसति तथैव गृहस्थः स्वगृहे वसति। त्वं स्वगृहे किं न वससि? अहं स्वगृहे वत्स्यामि। स किं भणति? यत् स इदानीं भणति तत् अहं न जानामि। त्वं जानासि किं? अहं अपि न जानामि। कः इदानीं ईश्वरं ध्यायति? अहं एकाग्रेण मनसा ईश्वरं ध्यायामि। तदा त्वं किं करोषि? अहं अपि तथैव ब्रह्माणं ध्यायामि। यदि त्वं परमेश्वरं ध्यास्यसि तर्हि शोभनं भविष्यति। स किमपि नैव वांछिष्यति। यदा स तत्र गमिष्यति तदा क्षेत्रे बीजं वप्स्यति। यदि न गमिष्यति तर्हि कथं बीजं वप्स्यति?

पाठ २०

शब्द

संगमः--संयोग	विहगः--पक्षी
संगः--मिलाप	विहंगमः--पक्षी
योधः--वीर	खगः--पक्षी
कासारः--तालाव	भृत्यः--नौकर
संमानः--मान	सेवकः--नौकर

संस्कृत वाक्य।

१ योधः अद्य युद्धं प्रति गमिष्यति। २ तस्य भृत्यः इदानीं किं भणति? ३ पश्य, खगः कथं आकाशे गच्छति? ४ कासारे जलं वर्तते। ५ जले सेवकः पतति। ६ ब्राह्मणः संमानं न इच्छति। ७ क्षत्रियः संमानं वांछति। ८ वैश्यः वाणिज्येन धनं इच्छति। ९ तव भृत्यः कर्मकुशलः अस्ति।

भाषा वाक्य।

१ वीर आज युद्धके प्रति जायेगा। २ उनका नौकर अब क्या बोलता है? ३ देख, पक्षी कैसा आकाशमें जाता है। ४ तालावमें जल है। ५ जलमें नौकर गिरता है। ६ ब्राह्मण संमान नहीं चाहता है। ७ क्षत्रिय संमान चाहता है। ८ वैश्य वाणिज्यसे धन चाहता है। ९ तेरा नौकर कर्ममें कुशल है।

निम्नलिखित वाक्य अब पढिये। पढते ही आपकी समझ में आजावेंगे—

अब निम्नलिखित शब्द स्मरण कीजिये—

शब्द ।

गुणः=गुण, रस्सी	समागमः–संगति
कामः=इच्छा	पर्वतः–पहाड
विनयः = विनय	मनोरथः--मनकी इच्छा
लोभः--लोभ	ज्वरः--ज्वर, बुखार
धूमः--धूवां	उपायः--उपाय, इलाज

संस्कृत--वाचन--पाठः ।

स योधः इदानीं किं करोति ? स वीरः पुरुषः इदानीं युद्धाय गन्तुं इच्छति । तस्य शस्त्रं त्वया कुत्र रक्षितं अस्ति ? मया तस्य शस्त्रं न कुत्रापि रक्षितम् । यज्ञदत्तस्य पुस्तकं तव भृत्येन कुत्र नीतम् ? अहं न जानामि तत् । तव भृत्यं अत्र आनय । मम भृत्यः जलार्थं कूपं प्रति गतः । स इदानीं एव अत्र आगमिष्यति । यः शास्त्रं जानाति स एव पण्डितः । यः शास्त्रं न जानाति स पंडितः कथं भवति ? यदि त्वं गन्तुं इच्छसि तर्हि अधुना एव गच्छ । स राजा सेवकैः सह अत्र एव इदानीं आगच्छति । अहं आकाशे खगं पश्यामि । यः जनः जले स्नानं करोति, स कः अस्ति ? यः मनुष्यः तस्मिन् जले इदानीं स्नानं करोति, सः महापण्डितः भट्टभास्करः अस्ति ॥

पाठ २१

संस्कृत वाक्य।

१ स गुणेन बद्धः। २ तव कः कामः अस्ति इदानीम् ? ३ यत्र यत्र धूमः तत्र तत्र वह्निः अस्ति। ४ स पर्वतः तत्र अस्ति। ५ तस्मिन् पर्वते शोभनं वनं अस्ति। ६ प्रतिदिनं अहं तत्र गच्छामि ईश्वरं ध्यायामि च। ७ यत्र कामः अस्ति तत्र लोभः अपि भवति। ८ ईश्वरस्य ध्यानं एव तत्र उपायः॥

भाषा वाक्य।

१ वह रस्सीसे बंधा हुआ है। २ तेरी कौनसी इच्छा है अब ? ३ जहां जहां धूआं है वहां वहां अग्नि है। ४ वह पहाड वहां है। ५ उस पर्वतपर उत्तम वन है। ६ प्रतिदिन मैं वहां जाता हूं और ईश्वरका ध्यान करता हूं। ७ जहां काम होता है वहां लोभभी होता है। ८ ईश्वरका ध्यानही वहां उपाय है।

शब्द।

उक्तं—कहा हुआ	स्थितं—ठहरा हुआ
पठितं—पढा ,,	प्राप्तं—प्राप्त किया ,,
दृष्टं—देखा ,,	कृतं—किया ,,
खादितं—खाया ,,	नीतं—लिया ,,
गतं—गया ,,	दण्डितं—दंड दिया ,,

आगतं—आया हुआ	धावितं—दौडा हुआ
भूतं—हुआ ,,	दत्तं—दिया ,,
पतितं—गिरा ,,	भ्रामितं—घुमाया ,,
लिखितं—लिखा ,,	उपविष्टं—बैठा ,,
पक्वं—पकाया ,,	नष्टं—नष्ट हुआ

संस्कृत वाक्य।

१ त्वया किं उक्तम्? २ मया पुस्तकं पठितम्। ३ तेन पुष्पं दृष्टम्। ४ मया कर्म न कृतम्। ५ तव पत्रं मया अद्य एव प्राप्तम्। ६ तव वस्त्रं मया न नीतम्। ७ यथा त्वया लिखितं तथा एव मया पठितम्।

भाषा—वाक्य।

१ तूने क्या कहा? २ मैंने पुस्तक पढी। ३ उसने फूल देखा। ४ मैंने कर्म नहीं किया। ५ तेरा पत्र मैंने आज ही प्राप्त किया। ६ तेरा वस्त्र मैंने नहीं लिया। ७ जैसा तूने लिखा वैसा मैंने पढा।

संधि किये हुए वाक्य।

तव कः कामोऽस्तीदानीम्? यत्र यत्र धूमस्तत्र तत्र वह्निरस्ति। स पर्वतस्तत्रास्ति। यत्र कामोऽस्ति तत्र लोभोऽपि भवति। ईश्वरस्य ध्यानमेव तत्रोपायः। त्वया किमुक्तम्? तव पत्रं मयाद्यैव प्राप्तम्।

पाठ २२

संस्कृत—वाक्य ।

१ त्वया पाठः पठितः । २ तेन पुस्तकं पठितम् । ३ मया अष्टाध्यायी पठिता ।

भाषावाक्य ।

१ तूने पाठ पढा है । २ उसने पुस्तक पढी है । ३ मैंने अष्टाध्यायी पढी है ।

यहां " पठित " यह शब्द तीनों लिंगोंके शब्दोंके साथ इस प्रकार बदलता है। इसी रीतिसे शब्दोंके लिंगोंके अनुसार उनके रूप बदलकर निम्न लिखित वाक्य बनते हैं—

संस्कृत वाक्य ।

१ तेन मंत्रः उक्तः। २ त्वया कविता उक्ता। ३ मया काव्यं उक्तम्। ४ त्वया मोदकः खादितः। ५मया करपट्टिका खादिता। ६ तेन अन्नं खादितम् । ७ रामः तत्र गतः ।८सीता अत्र आगता। ९ जलं तत्र गतम्। १०मया धनं प्राप्तम् । ११ त्वया अश्वः प्राप्तः । १२ तेन मुद्रिका प्राप्ता। १३ मया जलं तत्र न नीतम् । १४ त्वया सेवकः किं न नीतः? १५ तेन तत्र गौः नीता । १६ स पुरुषः कर्दमे पतितः। १७ सा स्त्री जले पतिता। १८ मम पत्रं कूपे पतितम् । १९ रामचंद्रेण पत्रं लिखितम् । २० नलेन पत्रिका लिखिता । २१ मया

लेखः लिखितः । २२ त्वया धनं न दत्तम् । २३ तेन भूमिः दत्ता । २४ मया ग्रन्थः दत्तः । २५ तव पातकं नष्टम् । २६ मम स्मृतिः न नष्टा । २७ तस्य ग्रंथः नष्टः किम् ?

भाषा—वाक्य ।

१ उसने मंत्र कहा । २ तूने कविता कही । ३ मैंने काव्य कहा । ४ तूने लड्डू खाया । ५ मैंने फुलका खाया । ६ उसने अन्न खाया । ७ राम वहां गया । ८ सीता यहां आगई । ९ जल वहां गया । १० मैंने धन प्राप्त किया । ११ तूने घोडा प्राप्त किया । १२ उसने अंगुठी प्राप्त की । १३ मैंने जल वहां नहीं लिया । १४ तूने सेवक क्यों नहीं लिया ? १५ उसने वहां गाय ली है । १६ वह पुरुष कीचडमें गिरा । १७ वह स्त्री जलमें गिर गई । १८ मेरा पत्र कुएमें गिर गया । १९ रामचंद्रने पत्र लिखा । २० नलने पत्र लिखा । २१ मैंने लेख लिखा । २२ तूने धन नहीं दिया । २३ उसने भूमि दी । २४ मैंने ग्रन्थ दिया । २५ तेरा पाप नष्ट हुआ । २६ मेरी स्मरणशक्ति नष्ट नहीं हुई । २७ उसका ग्रंथ नष्ट होगया क्या ?

इसी प्रकार अन्यान्य शब्दोंका प्रयोग करके वाक्य बना सकते हैं ।

पाठ २३

पीत-पीया हुआ	भुक्त- भोजन किया हुआ ।
भक्षित-खाया हुआ	श्रुत-सुना हुआ
ज्ञात-जाना हुआ	कथित-कहा हुआ
आज्ञात-आज्ञा किया हुआ	आरूढ--चढा हुआ
धृत-धारण किया हुआ	व्याख्यात---व्याख्यान दिया हुआ
आघ्रात-सूंघा हुआ	
पालित-पाला हुआ	रक्षित--रखा हुआ

संस्कृत वाक्य।

१ किं त्वया जलं पीतं? २ मया अन्नं भक्षितं जलं च पीतम्। ३ यत् त्वया उक्तं तत् सर्वं मया ज्ञातम्। ४ किं त्वया भुक्तं अन्नम्? ५ तेन एषः विषयः व्याख्यातः। ६ तेन भोजनपात्रं कुत्र रक्षितम्?

भाषा वाक्य।

१ क्या तूने जल पीया? २ मैंने अन्न खाया और जल पीया। ३ जो तूने कहा वह सब मैंने जान लिया। ४ क्या तूने अन्न खाया? ५ उसने इस विषयका व्याख्यान किया। ६ उसने भोजन का पात्र कहां रखा?

संस्कृत—वाचन—पाठः।

तव पात्रं जले पतितम्। यदा तत् जले पतितं तदा एव मया दृष्टम्। यदि त्वया अन्नं न भक्षितं,

तर्हि अत्र आगच्छ, अहं तुभ्यं अन्नं दास्यामि। तेन यदि चक्रं न भ्रामितं, तर्हि यन्त्रं कथं भ्रमति ? यदि तेन जलं न दत्तं, तर्हि त्वया कथं प्राप्तम्। त्वं तत्र उपविष्टः आसि, तथैव सः अपि उपविष्टः अस्ति। नृपेण स कथं दण्डितः? तेन किं कृतम्? यत् त्वया श्रुतं तत् एव इदानीं वद। तेन ईश्वरेण सर्वं जगत् बलेन कृतं अस्ति। यत् मया इदानीं व्याख्यातं तत् त्वया ज्ञातं किम् ? वीरस्य शस्त्रं मया अत्रैव रक्षितं, परंतु तत् इदानीं अत्र नास्ति, केन नीतं इति अहं न जानामि। यः यथा कर्म करोति, सः तथा एव फलं प्राप्नोति।

संधि किये हुए वाक्य।

यदि त्वयान्नं न भक्षितं तर्ह्यत्रागच्छ, अहं तुभ्यमन्नं दास्यामि। त्वं तत्रोपविष्टोऽसि तथैव सोऽप्युपविष्टोऽस्ति। नृपेण स कथं दण्डितः? तेन किं कृतम्? यत्त्वया श्रुतं तदेवेदानीं वद। तेनेश्वरेण सर्वं जगद्बलेन कृतमस्ति। यन्मयेदानीं व्याख्यातं तत्त्वया ज्ञातं किम्? वीरस्य शस्त्रं मयात्रैव रक्षितं, परंतु तदिदानीमत्र नास्ति, केन नीतमित्यहं न जानामि।

पाठ २४

निम्न लिखित शब्द अब स्मरण कीजिये—

शब्द ।

कुमारः--लडका	प्रयत्नः--यत्न
पादः--पांव	दिवसः--दिन
अपराधः--अपराध	विप्रः--ज्ञानी, ब्राह्मण
स्वर्गः--स्वर्ग	अस्ताचलः---सूर्यास्त होनेका पर्वत
अपवर्गः--स्वर्ग	मृगः---हरिण
समाजः--समाज	पान्थः----प्रवासी
अर्थः----धन	

संस्कृत वाक्य ।

१ तेन कुमारेण इदानीं किं उक्तम् । २ तस्मिन् समाजे एकः पण्डितः अस्ति । ३ तस्मिन् मम कः अपराधः? ४ पुरुषः अर्थस्य दासः । ५ पान्थः मार्गेण गच्छति । ६ अस्ताचलं सूर्यः गच्छति ।

भाषा वाक्य ।

१ उस लडकेने अब क्या कहा ? २ उस समाजमें एक पण्डित है । ३ उसमें मेरा क्या अपराध है ? ४ मनुष्य धनका दास है । ५ प्रवासी मार्गसे जाता है । ६ अस्तपर्वतके प्रति सूर्य जाता है ।

शब्द ।

दैत्यः--राक्षस	आचार्यः--आचार्य
पाठः--पाठ	चोरः--चोर
लेखः--लेख	सर्पः--सांप
दण्डः--दण्ड, सोटी	स्वरः--स्वर, आवाज
पुत्रः--पुत्र, लडका	वासः--निवास
वेदः--वेद	वृक्षः--वृक्ष

संस्कृत—वाचन—पाठः ।

मृगः वने भ्रमति । नरः ग्रामे भ्रमति । बिडालः गृहे भ्रमति । विप्रः स्वर्गं गन्तुं इच्छति । पण्डितः इदानीं एव ग्रामं गतः । यथा त्वया प्रयत्नः कृतः तथा एव तस्य फलं त्वया लब्धम् । अद्य शोभनः दिवसः अस्ति । वाचालः पुरुषः बहु वदति । मुनिः अल्पं वदति । स धनाढ्यः पुरुषः धनं ददाति । तस्य विशालं गृहं तस्मिन् नगरे वर्तते । कोमलं पुष्पं त्वया आनीतं अस्ति । ईश्वरः सर्वभूतानां हृद्देशे तिष्ठति । सर्वं जगत् स एव भ्रामयति । तं शरणं गच्छामि । तस्य प्रसादात् त्वं परां शांतिं प्राप्स्यसि । अहं मरणात् भीतः न अस्मि । सत्यस्य वचनं एव सदा श्रेयः भवति । यः सदा असत्यं वदति स एव पतति । त्वं कदा अपि असत्यं न वद ।

पाठ २५

संस्कृत वाक्य।

१ तेन लेखः लिखितः किम्। २ यः लेखः तेन लिखितः तं त्वं पठ। ३ तव पुत्रः इदानीं किं पठति? ४ त्वं हस्ते दंडं धारय। ५ तस्मिन् मार्गे सर्पः स्थितः। ६ त्वया वेदस्य पुस्तकं कुत्र रक्षितम्? ७ तव कुत्र वासः भवति? ८ चोरः केन मार्गेण गतः?

भाषा वाक्य।

१ उसने लेख लिखा क्या? २ जो लेख उसने लिखा है उसको तू पढ। ३ तेरा पुत्र अब क्या पढता है? ४ तू हाथ में दण्ड धारण कर। ५ उस मार्गमें सांप है। ६ तूने वेदकी पुस्तक कहां रखी है? ७ तेरा कहां निवास है? ८ चोर किस मार्गसे गया?

संस्कृत--वाचन--पाठः।

हे आचार्य! अहं न्यायशास्त्रं पठितुं इच्छामि। हे शिष्य! किं त्वया व्याकरणशास्त्रं पठितम्? यदि नहि पठितं, तर्हि प्रथमं व्याकरणशास्त्रं एव पठ। पश्चात् न्यायशास्त्रं पठिष्यसि।

तस्य महान् शब्दः अस्ति। तं पृच्छ, कुत्र गच्छसि इति। स वदति, अहं प्रभासनगरं अधुना गच्छामि इति। तस्मात् नगरात् स कदा पुनः आगमिष्यति?

तव पुत्रेण मम दण्डः कुत्र नीतः? स मम पुत्रः तव दण्डेन सह तत्र धावति। तं पश्य, स कथं धावति इति। यदा स धावति तदा त्वां पश्यति।

मम वस्त्रं कुत्र अस्ति? तत् सर्वं चोरेण नीतम्। पात्रं अपि नास्ति। तत् अपि तेन एव नीतम्। स चोरः केन मार्गेण गतः इति त्वं जानासि किम्?

संधि किये हुए वाक्य।

तेन लेखो लिखितः किम्? यो लेखस्तेन लिखितस्तं त्वं पठ। तव पुत्र इदानीं किं पठति? तव कुत्र वासो भवति? हे आचार्य! अहं न्यायशास्त्रं पठितुमिच्छामि। हे शिष्य! किं त्वया व्याकरणशास्त्रम्पठितम्? यदि नहि पठितं, तर्हि प्रथमं व्याकरणशास्त्रमेव पठ। पश्चान्न्यायशास्त्रं पठिष्यसि। तस्य महाञ्छन्दोऽस्ति। तं पृच्छ, कुत्र गच्छसीति। स वदत्यहं प्रभासनगरमधुना गच्छामीति। तस्मान्नगरात्स कदा पुनरागमिष्यति?

कुत्र नीतस्तव पुत्रेण मम दण्डः? स मम पुत्रस्तव दण्डेन सह तत्र धावतीति। पश्य तं स कथं धावति?

मम वस्त्रं कुत्राऽस्ति? तत्सर्वं चोरेण नीतम्। पात्रमपि नास्ति। तदपि तेनैव नीतम्। स चोरः केन मार्गेण गत इति त्वं जानासि किम्?

पाठ २६

इस पाठमें निम्नलिखित श्लोक आप पढ़िये-

नमः शिवाय शान्ताय निश्चलाय यशस्विने ।
जगद्बीजाय श्रेष्ठाय तस्मै वीर्यात्मने नमः ॥ १ ॥

पद-- नमः । शिवाय । शान्ताय । निश्चलाय । यशस्विने । जगत्+बीजाय । श्रेष्ठाय । तस्मै । वीर्य+आत्मने । नमः ।

अर्थ--(शिवाय) कल्याणमय, (शान्ताय) शांत, निश्चल, (यशस्विने) यशस्वी, (श्रेष्ठाय) श्रेष्ठ, (वीर्य+आत्मने) वीर्यमय आत्मा रूप (तस्मै) उस (जगत्+बीजाय) जगत्के बीजभूत ईश्वरके लिये नमस्कार है ।

सर्वेऽपि सुखिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु न कश्चिद् दुःखमाप्नुयात् ॥

पद-- सर्वे । अपि । सुखिनः । सन्तु । सर्वे । सन्तु । निरा-मयाः । सर्वे । भद्राणि । पश्यन्तु । न । कः । चित् । दुःखं । आप्नुयात् ।

अन्वयः--सर्वे अपि सुखिनः सन्तु । सर्वे निरामयाः सन्तु । सर्वे भद्राणि पश्यन्तु । कःचित् दुःखं न आप्नुयात् ।

अर्थ-- (सर्वे) सब (अपि) ही (सुखिनः) सुखी (सन्तु) हों । सब (निरामयाः) रोगरहित हों । सब (भद्राणि) कल्याणोंको (पश्यंतु) देखें और (कःचित्) कोई भी दुःख को (न आप्नुयात्) प्राप्त न होवे ।

न तपस्तप इत्याहुर्ब्रह्मचर्यं तपोत्तमम् ।
ऊर्ध्वरेता भवेद्यस्तु स देवो न तु मानुषः ॥

पद--न । तपः । तपः । इति । आहुः । ब्रह्म -- चर्यं । तप+उत्तमम् । उर्ध्व+रेताः । भवेत् । यः । तु । सः । देवः । न । तु । मानुषः ॥

अन्वयः-- तपः तपः इति न आहुः । ब्रह्मचर्यं तपोत्तमम् । यः तु ऊर्ध्वरेताः भवेत्, सः देवः, न तु मानुषः ॥

अर्थ-- तपको तप ऐसा नहीं कहते । ब्रह्मचर्यही (तप+उत्तमं) उत्तम तप है । जो (तु) निश्चयसे ऊर्ध्वरेता होता है, वह देव है, वह मनुष्य नहीं है ।

आजन्ममरणाद्यस्तु ब्रह्मचारी भवेदिह ।
न तस्य किंचिदप्राप्यं इति विद्धि नराधिप ॥

महाभारत अनु० ७५।३९

पद-- आ+जन्म+मरणात् । यः । तु । ब्रह्मचारी । भवेत् । इह । न । तस्य । किंचित् । अप्राप्यं । इति । विद्धि । नराधिप ।

अन्वयः-- हे नराधिप ! यः तु आजन्ममरणात् ब्रह्मचारी इह भवेत् । तस्य किञ्चित् अप्राप्यं न इति विद्धि ॥

अर्थ-- हे (नर+अधिप) मनुष्योंके प्रभु ! जो (तु) निःसंदेह जन्मसे मरणपर्यन्त ब्रह्मचारी (इह) इस जगत्में (भवेत्) होवे, (तस्य) उसके लिए (किंचित्) कुछभी (अप्राप्यं) प्राप्त होने अयोग्य नहीं ऐसा (विद्धि) तू जान ।

पाठ २७

पंचविंशतिपर्यन्तं ब्रह्मचर्यं समाचरेत्।
गुणवाञ्छक्तिसंपन्नः शतायुस्तु भविष्यति ॥

पद-पंचविंशतिपर्यंतं। ब्रह्मचर्यं। समाचरेत्। गुणवान्। शक्तिसंपन्नः। शतायुः। तुः। भविष्यति ॥

अर्थ— (पंच+विंशति+पर्यंतं) पचीस वर्ष तक ब्रह्मचर्य (समाचरेत्) जो आचरण करेगा, वह गुणवान्, शक्तिसंपन्न और शतायु (तु) निःसंदेह (भविष्यति) होगा।

कायेन मनसा वाचा सर्वावस्थासु सर्वदा।
सर्वत्र मैथुनत्यागो ब्रह्मचर्यं विधीयते ॥

पद-कायेन। मनसा। वाचा। सर्व+अवस्थासु। सर्वदा। सर्वत्र। मैथुन-त्यागः। ब्रह्मचर्यं। विधीयते।

अर्थ--(कायेन) शरीरसे (मनसा) मनसे (वाचा) वाणीसे (सर्व+अवस्थासु) सब अवस्थाओंमें सर्वदा और सर्वत्र मैथुनका त्याग करना ब्रह्मचर्य (विधीयते) कहा जाता है।

यदीच्छसि वशीकर्तुं जगदेकेन कर्मणा।
सुदुर्वृत्तेन्द्रियग्रामं बलाच्छीघ्रं निवारय ॥

पद-यदि। इच्छसि। वशीकर्तुं। जगत्। एकेन। कर्मणा। सु+दुर्+वृत्त+इंद्रिय+ग्रामं। बलात्। शीघ्रं। निवारय ॥

अन्वयः–यदि एकेन कर्मणा जगत् वशीकर्तुं इच्छसि । सुदुर्वृत्त+इंद्रिय+ग्रामं शीघ्रं बलात् निवारय ॥

अर्थ---यदि एक कर्मसे सब जगत् वशमें करनेकी इच्छा तू करता है, तो दुष्ट आचरण करनेवाले इंद्रियोंके समुदायको शीघ्रही बलके साथ (निवारय) निवारण कर ।

इन श्लोकोंको वारंवार पढके देखिये कि आपकी योग्यता कितनी हुई है और संस्कृतमें कैसी प्रगति आप कर रहे हैं ।

संधि किये हुए वाक्य ।

तव पात्रं जले पतितम् । यदा तज्जले पतितं तदेव मया दृष्टम् । यदि त्वयान्नं न भक्षितं तर्ह्यत्रागच्छाहं तुभ्यमन्नं दास्यामि । तेन यदि चक्रं न भ्रामितं, तर्हि यन्त्रं कथं भ्रमति ? यदि तेन जलं न दत्तं तर्हि त्वया कथं प्राप्तम् ? त्वं यथा तत्रोपविष्टोऽसि तथैव सोऽप्युपविष्टोऽस्ति, नृपेण स कथं दण्डितः ? किं तेन कृतम् ? यत्त्वया श्रुतं तदेवेदानीं वद । तेनेश्वरेण सर्वं जगद्बलेन धृतमस्ति । यन्मयेदानीं व्याख्यातं तत्त्वया ज्ञातं किम् ? वीरस्य शस्त्रं मयात्रैव रक्षितं, परन्तु तदिदानीमत्र नास्ति, केन नीतमित्यहं न जानामि । यो यथा करोति स तथैव फलं प्राप्नोति ।

पाठ २८

संस्कृत—वाचन—पाठः ।

(१)

हे राजेन्द्र ! शमीको नाम परधर्मात्मा शान्तो दान्तो महातपा एक ऋषिस्तव विषये वर्तते । त्वया मौनव्रतस्य तस्य स्कंधे प्राणैर्वियुक्तः सर्पो धनुष्कोट्याऽवसक्तः । स ऋषिस्तव तत्कर्म क्षान्तवान् । परंतु तस्य पुत्रो न चक्षमे । हे राजन् ! तेनर्षिपुत्रेणाद्य पितुरज्ञातमेव त्वं शप्तोऽसि । इदानीं तत्र त्वं स्वरक्षां कुरुष्वेति पुनः पुनस्त्वां स ऋषिरब्रवीत् । तत्केनाप्यन्यथाकर्तुं न शक्यमिति चापि सोऽब्रवीत् ।

(२)

स पुरुषो भारं वहति । यथा स भारं वहति तथाऽहं न वहामि । त्वमिदानीं किं भणासि ? स शब्दान्नटति । दीपं दीपय, तमन्नानय च । कृषीवलो बीजं वपति । अहमपि तथैव बीजं वप्स्यामि । यथा त्वं बीजं वपसि तथा स न वपति । रामेश्वरो गृहे वसति । मुनिर्वने वसति ।

(३)

हे मित्र, त्वं किं वाञ्छसि ? अहं पठितुमिच्छामि ।

किमत्रैव पठितुमिच्छसि ? अथवा काशीक्षेत्रं पठिष्यसि? अहं व्याकरणशास्त्रमत्र पठिष्यामि, तथा च न्यायशास्त्रं काशीनगरं गत्वा, तत्र कस्यापि बुधस्य समीपे स्थित्वा पठिष्यामि। यथा राजा स्वनगरे वसति, तथैव गृहस्थः स्वगृहे वसति। त्वं स्वगृहे किं न वससि ? अहं स्वगृहे वत्स्यामि। स किं भणति ? यत्स इदानीं भणति, तदहं न जानामि। त्वं जानासि किम् ? अहमपि न जानामि। क इदानीमीश्वरं ध्यायति ? अहमेकाग्रेण मनसेश्वरं ध्यायामि। यदि त्वं परमेश्वरं ध्यास्यसि, तर्हि शोभनं भविष्यति। स किमपि नैव वांछिष्यति। यदा स तत्र गमिष्यति तदा क्षेत्रे बीजं वप्स्यति।

(४)

योधोऽद्य युद्धं प्रति गमिष्यति। तस्य भृत्य इदानीं किं भणति ? पश्य, खगः कथमाकाशे गच्छति। कासारे जलं वर्तते। जले सेवकः पतति। ब्राह्मणः संमानं नेच्छति। क्षत्रियः संमानं वाञ्छति। वैश्यो वाणिज्येन धनमिच्छति। तव भृत्यः कर्मकुशलोऽस्ति।

पाठ २९

संस्कृत-वाचन-पाठः।

स योध इदानीं किं करोति? स वीरः पुरुष इदानीं युद्धाय गन्तुमिच्छति। तस्य शस्त्रं त्वया कुत्र रक्षितमस्ति? मया तस्य शस्त्रं न कुत्रापि रक्षितम्। यज्ञदत्तस्य पुस्तकं तव भृत्येन कुत्र नीतम्? अहं न जानामि तत्। तव भृत्यमत्रानय। मम भृत्यो जलार्थं कूपं प्रति गतः। स इदानीमेवात्रागमिष्यति। यः शास्त्रं जानाति स एव पण्डितः। यः शास्त्रं न जानाति स पण्डितः कथं भवति? यदि त्वं तत्र गन्तुमिच्छसि तर्ह्यधुनैव गच्छ। स राजा सेवकैः सहात्रैवेदानीमागच्छति। अहमाकाशे तं खगं पश्यामि, यो जनो जले स्नानं करोति स कोऽस्ति? यो मनुष्यस्तस्मिञ्जल इदानीं स्नानं करोति, स महापण्डितो भट्टभास्करोऽस्ति।

स गुणेन बद्धः। तव कः कामोऽस्तीदानीम्? यत्र यत्र धूमस्तत्र तत्र वह्निरस्ति। स पर्वतस्तत्राऽस्ति। तस्मिन्पर्वते शोभनं वनमस्ति। प्रतिदिनमहं तत्र गच्छामीश्वरं ध्यायामि च। यत्र कामोऽस्ति तत्र लोभोऽपि भवति। ईश्वरस्य ध्यानमेव तत्रोपायः।

त्वया किमुक्तम् ? मया पुस्तकं पठितम्। तेन पुष्पं दृष्टम्। मया कर्म न कृतम्। तव पत्रं मयाद्यैव प्राप्तम्। तव वस्त्रं मया नीतम्। यथा त्वया लिखितं तथैव मया पठितम्।

त्वया पाठः पठितः। तेन पुस्तकं पठितम्। मयाऽष्टाध्यायी पठिता। तेन मंत्र उक्तः। त्वया कवितोक्ता। मया काव्यमुक्तम्। त्वया मोदकः खादितः। मया करपट्टिका खादिता। तेनान्नं खादितम्। रामस्तत्र गतः। सीतात्रागता। जलं तत्र गतम्। मया धनं प्राप्तम्। त्वयाऽश्वः प्राप्तः। तेन मुद्रिका प्राप्ता। मया जलं तत्र न नीतम्। त्वया सेवकः किं न नीतः? तेन तत्र गौर्नीता। स पुरुषः कर्दमे पतितः। सा स्त्री जले पतिता। मम पत्रं कूपे पतितम्। रामचन्द्रेण पत्रं लिखितम्। नलेन पत्रिका लिखिता। मया लेखो लिखितः। त्वया धनं दत्तम्। तेन भूमिर्दत्ता। मया ग्रंथो दत्तः। तव पालकं नष्टम्। मम स्मृतिर्न नष्टा। तस्य ग्रंथो नष्टः किम्?

किं त्वया जलं पीतम्? मयान्नं भक्षितं जलं च पीतम्। यत्त्वयोक्तं तत्सर्वं मया ज्ञातम्। किं त्वया भुक्तमन्नम्? तेनैष विषयो व्याख्यातः। तेन भोजनपात्रं कुत्र रक्षितम्?